
श्रीमद् भागवत का यह सार
भगवद् भक्ति ही आधार

# श्रीमद्भागवत रसिक कुटुंब

## UG-11.15- तृतीय सोपान



स्व धाम प्रस्थान को देखो हो रहे श्री कृष्ण तैयार।
उद्धृत किए उद्धव समक्ष अद्‌भुत अनमोल उद्‌गार।।

नारायणं(न्) नमस्कृत्य, नरं(ञ्) चैव नरोत्तमम्।
देवीं(म्) सरस्वतीं(वँ) व्यासं(न्), ततो जयमुदीरयेत्॥
नामसङ्कीर्तनं(यँ) यस्य, सर्वपापप्रणाशनम्।
प्रणामो दुःखशमनस्, तं(न्) नमामि हरिं(म्) परम्॥

श्रीमद्भागवतमहापुराणम्

एकादशः स्कन्धः

॥ अथ पञ्चदशोऽध्यायः ॥

### श्रीभगवानुवाच

जितेन्द्रियस्य युक्तस्य, जितश्वासस्य योगिनः ।
मयि धारयतश्चेत, उपतिष्ठन्ति सिद्धयः ॥ 1॥

जितश्वा + सस्य ,धारयतश् + चेत

उद्धव उवाच

कया धारणया कास्वित् , कथं(म्)स्वित् सिद्धिरच्युत ।
कति वा सिद्धयो ब्रूहि, योगिनां(म्) सिद्धिदो भवान् ॥ 2॥

सिद्धि + रच्युत

श्रीभगवानुवाच

सिद्धयोऽष्टादश प्रोक्ता, धारणायोगपारगैः ।

तासामष्टौ मत्प्रधाना, दशैव गुणहेतवः ॥ 3॥

धारणा+ योगपारगैः

अणिमा महिमा मूर्तेर्- लघिमा प्राप्तिरिन्द्रियैः ।

प्राकाम्यं(म्) श्रुतदृष्टेषु, शक्तिप्रेरणमीशिता ॥ 4॥

प्राप्ति+ रिन्द्रियैः, शक्ति+ प्रेरण+ मीशिता

गुणेष्वसं(ङ्)गो वशिता, यत्कामस्तदवस्यति ।

एता मे सिद्धयः(स्) सौम्य, अष्टावौत्पत्तिका मताः ॥ 5॥

यत्कामस् +तद+ वस्यति, अष्टा+ वौत् + पत्तिका

अनूर्मिमत्त्वं(न्) देहेऽस्मिन्, दूरश्रवणदर्शनम् ।

मनोजवः(ख्) कामरूपं(म्), परकायप्रवेशनम् ॥ 6॥

अनूर् + मिमत् +त्वं(न्), दूर+ श्रवण+ दर्शनम् ,परका+ यप्रवेशनम्

स्वच्छन्दमृत्युर्देवानां(म्), सहक्रीडानुदर्शनम् ।

यथास(ङ्)कल्पसं(म्)सिद्धि- राज्ञाप्रतिहतागतिः ॥ 7॥

स्वच्छन्द+ मृत्युर्+ देवानां(म्), सह+ क्रीडा+ नुदर्शनम्

यथा+ स(ङ्)कल्प+ सं(म्)सिद्धि ,राज्ञा+ प्रति+ हतागतिः

त्रिकालज्ञत्वमद्वन्द्वं(म्), परचित्ताद्यभिज्ञता ।

अग्न्यर्काम्बुविषादीनां(म्), प्रतिष्टम्भोऽपराजयः ॥ 8॥

त्रिका+ लज्ञत्व+ मद्वन्द्वं(म्), परचित्ता+ द्यभिज्ञता

अग्न्यर्+ काम्बु+ विषादीनां(म्), प्रतिष्+ टम्भोऽ+ पराजयः

एताश्चोद्देशतः(फ्) प्रोक्ता, योगधारणसिद्धयः ।

यया धारणया या स्याद् , यथा वा स्यान्निबोध मे ॥ 9॥

एताश् + चोद् + देशतः ,योग+ धारण+ सिद्धयः, स्यान्+ निबोध

भूतसूक्ष्मात्मनि मयि,*तन्मात्रं(न्) धारयेन्मनः ।
अणिमानमवाप्नोति, *तन्मात्रोपासको मम ॥ 10॥

भूत+ सूक्ष्मात्+ मनि, अणिमा +नम +वाप्नोति ,तन्मात्रो+ पासको

म*हत्यात्*मन्मयि परे, यथासं(म्)स्थं(म्) मनो दधत् ।
महिमानमवाप्नोति,भूतानां(ञ्) च पृथक् पृथक् ॥ 11॥

महत्यात् + मन्मयि, महिमा+ नम+ वाप्नोति

परमाणुमये चित्तं(म्),भूतानां(म्) मयि रं(ञ्)जयन् ।
कालसूक्ष्मार्थतां(यँ) योगी, लघिमानमवाप्नुयात् ॥12॥

परमा+ णुमये, काल+ सूक्ष्मार्+ थतां(यँ), लघिमा+ नम+ वाप्नुयात्

धारयन् मय्यहं(न्)तत्त्वे, मनो वैकारिकेऽखिलम् ।
सर्वेन्द्रियाणामात्*मत्वं(म्), प्राप्तिं(म्) प्राप्नोति *मन्मनाः ॥ 13॥

वैका+ रिकेऽ+ खिलम् ,सर्वेन्द्रिया+ णामात्+ मत्वं(म्)

म*हत्यात्मनि यः(स्) सूत्रे, धारयेन्मयि मानसम् ।
प्राकाम्यं(म्) पारमेष्ठ्यं(म्) मे, *विन्दतेऽ*व्यक्त*जन्मनः ॥ 14॥

महत् +यात् + मनि ,धारयेन्+ मयि ,विन्दतेऽ+ व्यक्त+ जन्मनः

*विष्णौ त्र्यधीश्वरे चित्तं(न्), धारयेत् काल*विग्रहे ।
स *ईशित्वमवाप्नोति*, *क्षेत्र*क्षेत्रज्ञचोदनाम् ॥ 15॥

ईशित् + वम+ वाप्नोति, क्षेत्र+ क्षेत्रज्ञ+ चोदनाम्

नारायणे तुरीयाख्ये, भग*वच्*छब्द*शब्दिते ।
मनो मय्यादधद् योगी, *मद्धर्मा वशितामियात् ॥ 16॥

भगवच् + छब्द + शब्दिते, मय्या+ दधद् ,वशिता+ मियात्

निर्गुणे ब्रह्मणि मयि, धारयन् विशदं(म्) मनः ।
परमा*नन्दमाप्नोति, *यत्र कामोऽवसीयते ॥ 17॥

परमा+ नन्दमाप्+ नोति

श्वेतद्वीपपतौ चित्तं(म्), शुद्धे धर्ममये मयि ।

धारयञ्छ्वेततां(यँ) याति, षडूर्मिरहितो नरः ॥ 18॥

श्वेतद् + वीपपतौ ,धारयञ्+ छ्वेततां(यँ),षडूर् + मिरहितो

मय्याकाशात्मनि प्राणे, मनसा घोषमुद्वहन् ।

तत्रोपलब्धा भूतानां(म्), हं(म्)सो वाचः(श्) शृणोत्यसौ ॥ 19॥

मय्या+ काशात्+ मनि ,घोषमुद्+ वहन् ,तत्रो+ पलब्धा

चक्षुस्त्वष्टरि सं(यँ)योज्य, त्वष्टारमपि चक्षुषि ।

मां(न्) तत्र मनसा ध्यायन्, विश्वं(म्) पश्यति सूक्ष्मदृक् ॥20

चक्षुस् +त्वष्टरि ,त्वष्टा+ रमपि

मनो मयि सुसं(यँ)योज्य, देहं(न्) तदनु वायुना ।

मद्धारणानुभावेन, तत्रात्मा यत्र वै मनः ॥ 21॥

मद्+ धारणा+ नुभावेन

यदा मन उपादाय, यद् यद् रूपं(म्) बुभूषति ।

तत्तद् भवेन्मनोरूपं(म्), मद्योगबलमाश्रयः ॥ 22॥

भवेन्+ मनोरूपं(म्), मद्यो+ गब+ लमाश्रयः

परकायं(वँ) विशन् सिद्ध, आत्मानं(न्) तत्र भावयेत् ।

पिण्डं(म्) हित्वा विशेत् प्राणो, वायुभूतः(ष्) षडङ्घ्रिवत् ॥ 23॥

पार्ष्ण्याऽऽपीड्य गुदं(म्) प्राणं(म्), हृदुरः(ख्)कण्ठमूर्धसु ।

आरोप्य ब्रह्मरन्ध्रेण, ब्रह्म नीत्वोत्सृजेत्तनुम् ॥ 24॥

पार् + ष्ण्याऽऽ+ पीड्य ,हृदुरः(ख्)+ कण्ठ+ मूर्धसु ,नीत्वोत् + सृजेत् +तनुम्

विहरिष्यन् सुराक्रीडे, मत्स्थं(म्) सत्त्वं(वँ) विभावयेत् ।

विमानेनोपतिष्ठन्ति, सत्त्ववृत्तीः(स्) सुरस्त्रियः ॥ 25॥

विमानेनो+ पतिष्ठन्ति

यथा सं(ङ्)कल्पयेद् बुद्ध्या, यदा वा मत्परः(फ्) पुमान् ।

मयि सत्ये मनो युं(ञ्)जं(म्)स्- तथा तत् समुपाश्नुते ॥ 26॥

समुपाश्+ नुते

यो वै मद्भावमापन्न, ईशितुर्वशितुः(फ्) पुमान् ।

कुतश्चिन्न विहन्येत, तस्य चाज्ञा यथा मम ॥ 27॥

ईशितुर्+ वशितुः(फ्), कुतश्+ चिन् + न

मद्भक्त्या शुद्धसत्त्वस्य, योगिनो धारणाविदः ।

तस्य त्रैकालिकी बुद्धिर्- जन्ममृत्यूपबृं(म्)हिता ॥ 28॥

जन्ममृत्यू+ पबृं(म्)हिता

अग्न्यादिभिर्न हन्येत, मुनेर्योगमयं(वँ) वपुः ।

मद्योगश्रान्तचित्तस्य, यादसामुदकं(यँ) यथा ॥ 29॥

अग्न्या+ दिभिर्+ न ,मुनेर्+ योगमयं(वँ)

मद्यो+ गश्रान्+ तचित्तस्य ,यादसा+ मुदकं(यँ)

मद्विभूतीरभिध्यायन्, श्रीवत्सास्त्रविभूषिताः ।

ध्वजातपत्रव्यजनैः(स्), स भवेदपराजितः ॥ 30॥

मद्+ विभूती+ रभि+ध्यायन् , श्रीवत्सास्+ त्रविभूषिताः ,ध्वजा+ तपत्र+ व्यजनैः(स्)

उपासकस्य मामेवं(यँ), योगधारणया मुनेः ।

सिद्धयः(फ्) पूर्वकथिता, उपतिष्ठन्त्यशेषतः ॥ 31॥

योगधा+ रणया , उप+ तिष्ठन्त्य+ शेषतः

जितेन्द्रियस्य दान्तस्य, जितश्वासात्मनो मुनेः ।

मद्धारणां(न्) धारयतः(ख्), का सा सिद्धिः(स्) सुदुर्लभा ॥ 32॥

जितश् + वासात् + मनो

अन्तरायान् वदन्त्येता, युं(ञ्)जतो योगमुत्तमम् ।

मया सम्पद्यमानस्य, कालक्षपणहेतवः ॥ 33॥

सम्पद्य+ मानस्य ,काल+ क्षपण+ हेतवः

जन्मौषधितपोमन्त्रैर्- यावतीरिह सिद्धयः ।
योगेनाप्नोति ताः(स्) सर्वा, नान्यैर्योगगतिं(व्ँ) व्रजेत् ॥ 34॥

जन्मौ+ षधितपो+ मन्त्रैर् ,योगेनाप्+ नोति ,नान्यैर्+ योगगतिं(व्ँ)

सर्वासामपि सिद्धीनां(म्), हेतुः(फ्) पतिरहं(म्) प्रभुः ।
अहं(य्ँ) योगस्य सां(ङ्)ख्यस्य, धर्मस्य ब्रह्मवादिनाम् ॥ 35॥

अहमात्माऽऽन्तरो बाह्योऽ - नावृतः(स्) सर्वदेहिनाम् ।
यथा भूतानि भूतेषु, बहिरन्तः(स्) स्वयं(न्) तथा ॥ 36॥

इति श्रीमद्भागवते महापुराणे पारमहं(म्)स्यां(म्)
सं(म्)हितायामेकादशस्कन्धे पञ्चदशोऽध्यायः ॥ 15॥

ॐ पूर्णमदः(फ्) पूर्णमिदं(म्)पूर्णात्पूर्णमुदच्यते
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते।।
ॐ शान्तिः(श्)शान्तिः(श्)शान्तिः।।

